# A-II/1/22AMIS2CCTC1/23

## द्वितीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-20)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. औत्पत्तिकसूत्रं पूर्णतया लिखत।
2. का नाम चोदना ?
3. योगाचारमते ज्ञानं कीदृशं स्वीक्रियते ?
4. "तस्य साम्यभावमिच्छन्ति ये माध्यमिकवादिनः" इत्यस्य कोऽर्थः ?
5. निरालम्बनत्वानुमानप्रयोगं दर्शयत
6. निरालम्बनत्वानुमाने एकं दोषं दर्शयत।
7. शून्यवादे पूर्वपक्षस्य सारमेकेन वाक्येन लिखत।
8. अनुमानस्य लक्षणं किम् ?
9. को नाम व्याप्यः ?
10. व्यापको नाम कः ?
11. "पर्वतो वह्निमान् धूमादि"त्यनुमाने प्रमेयस्वरूपं किम् ?
12. अनुमानलक्षणे ज्ञातसम्बन्धवचनेन कस्य निराकरणं क्रियते ?
13. असिद्धेरेकमुदाहरणं लिखत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. औत्पत्तिकसूत्रं व्याख्यात।
15. लोकप्रसिद्धत्वाद्धर्माधर्मयोः किमर्थं तत्र प्रमाणपरीक्षेति शङ्कां तत्समाधानं च यथाग्रन्थं प्रतिपादयत।

16. निरालम्बनवादपूर्वपक्षं प्रतिपादयत।

17. निरालम्बनत्वानुमाने निरस्ते कथं पूर्ववक्षी (शून्यवादी) प्रत्यवतिष्ठते?

18. भाष्योक्तमनुमानलक्षणं विलिख्य यथावार्तिकं तत्रत्यपदानि व्याख्यात।

19. अनुमानलक्षणे असन्निकृष्टपदव्यावर्त्यं किम्? सोदाहरणं संक्षेपेण दर्शयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. निरालम्बनत्वानुमानं खण्डयत।

21. शून्यवादसारमुपस्थापयत।

22. अनुमाने कः प्रमेय इति यथाग्रन्थं विचारयत।

# A-II/2/22AMIS2CCTC2/23

## द्वितीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-21)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. धात्वर्थस्य भावनायां कथमन्वयः?
2. तिबादेः कुत्र शक्तिः?
3. भावनाया मुख्यविशेष्यत्वे किं प्रमाणम्?
4. धर्मः क्षरति कीर्तनादित्यस्य कोऽर्थः?
5. अपूर्वाधिकरणे पूर्वपक्षे यागेन फले जननीये को व्यापारः?
6. समुदायापूर्वमुदाहरत।
7. वैयाकरणमते तिबाद्यर्थः कः?
8. गुणकर्माणि उदाहरत।
9. प्रधानकर्माणि उदाहरत।
10. अग्निसम्मार्गः गुणकर्म उत प्रधानकर्म?
11. गुणकामाधिकरणसूत्रार्थं लिखत।
12. गुणकामाधिकरणविषयवाक्यं लिखत।
13. प्रतिपदाधिकरणे कः संशयः कृतः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रतिपदाधिकरणमारचयत।
15. भावनायां धात्वर्थस्यैव करणत्वमिति साधयत।

16. फलमात्रं धात्वर्थ इति मतं खण्डयत।

17. आख्यातार्थविषये पार्थसारथिमिश्रमतं खण्डयत।

18. अपूर्वाधिकरणमारचयत।

19. इन्द्रियकामाधिकरणपूर्वपक्षमुपस्थापयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. धात्वर्थातिरिक्तां भावनां साधयत।

21. भावनामुख्यविशेष्यकशाब्दबोधं प्रतिपादयत।

22. सम्मार्गाधिकरणमारचयत।

## A-II/3/22AMIS2CCTC3/23

### द्वितीयसत्रार्द्धः

### तृतीयपत्रम् (DSCC-22)

### मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. पायनशब्दार्थः कः ?
2. अनतिदृश्यम् इत्यस्य कोऽर्थः ?
3. त्रिधातु इत्यस्य अर्थं लिखत।
4. वेदिः नाम का ?
5. उदूहति इत्यस्य कोऽर्थः ?
6. अकूर्मपृषन् नाम किम् ?
7. अणिकाषम् इति शब्दस्य अर्थः कः ?
8. सामिधेनीस्वरः कः ?
9. व्युदूहन्ति नाम किम् ?
10. व्यतिषङ्कः इत्यस्य अर्थं विवृणुत।
11. अत्यावधति इत्यस्य कोऽर्थः ?
12. जिह्मः कः ?
13. अभिप्राणिति इत्यस्य कोऽभिप्रायः ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. "दर्भैर्वेदिमन्नर्धाय दक्षिणतस्सन्नहनं स्तृणात्यक्ष्णया वा" इति सूत्रस्थविषयान् प्रस्तुवत।
15. "वेदेन भस्म प्रमृज्य तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः इति पात्र्यां प्रतिष्ठापयति" –व्याख्यात।

16. "अस्तु श्रौषडित्याग्नीध्रोऽपरेणोत्करं दक्षिणामुखस्तिष्ठन् स्वयं सम्मार्गांश्च धारयन् प्रत्याश्रावयति" –व्याख्यात।

17. "अनूच्यमाने शंयुवाक आहवनीये परिधीन् प्रहरति" –व्याख्यात।

18. दक्षिणाग्नाविध्मप्रव्रश्चनान्यभ्याधाय पिष्टलेपफलीकरण शेमौ जुहोति।

19. "स्वर्गकामो दर्शपूर्णमासौ एककाम:" –व्याख्यात।

## खण्ड: – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. दर्शपूर्णमासानुष्ठानकाल:।

21. दर्शपूर्णमासौ।

22. कल्पसूत्रम्।

# A-II/4/22AMIS2CCTC4/23

## द्वितीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-23)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. पूर्वमीमांसायाः द्वितीयाध्यायस्य द्वितीयपादार्थः कः?
2. अग्निष्टुद् – यागविधायकं वाक्यं किम्?
3. सौभरं नाम किम्?
4. भवदेवमते सौभरं कीदृशम्?
5. तृतीयाध्यायस्य प्रथमपादार्थः कः?
6. श्रुतिलक्षणं लिखत?
7. तेषामर्थाधिकरणसंशयः कः?
8. अरुणाधिकरणस्य विषयवाक्यं किम्?
9. एकहायनी पदार्थः कः?
10. "ग्रहं सम्मार्ष्टि" इत्यत्र एकत्वं विवक्षितम् उत न?
11. श्रुतिप्रकरणविरोधोदाहरणं लिखत।
12. प्रकरणसमाख्ययोर्विरोधोदाहरणं लिखत।
13. तृतीयाध्यायोक्तः बाधः कः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. रेवत्यधिकरणपूर्वपक्षं संक्षेपेण निरूपयत।
15. सौभराधिकरणसिद्धान्तः कः?

16. पुरोडाशधर्माणां सर्वार्थत्वम् उत तन्मात्रार्थत्वमिति साधयत।

17. अरुणाधिकरणसिद्धान्तं निरूपयत।

18. ग्रहैकत्वाधिकरणस्य पूर्वपक्षे कांश्चन विशेषान् साधयत।

19. सोदाहरणं श्रुतिलिङ्गयोः प्राबल्यदौर्बल्यविषयं प्रस्तुवत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. रेवत्यधिकरणम्।

21. ग्रहैकत्वाधिकरणम्।

22. बलाबलाधिकरणम्।